मम । अग्निवर्णोज्ज्वलन् धीमान् स द्विजो रथधूर्य्यवत् । प्रतोदेनातुदद्वालां रुक्मिणीं मम पश्यतः । न च मे स्तोकमप्यासीद्दुःखमीर्ष्याकृतं तदा । तथा स राजमार्गेण महता निर्ययौ बहिः । तद्दृष्ट्वा महदाश्चर्य्यं दाशार्हा जातमन्यवः । तत्राजल्पन् मिथः केचित् समाभाष्य परस्परम् । ब्राह्मणा एव जायेरन् नान्यो वर्णः कथञ्चन । को ह्येनं रथमास्थाय जीवेदन्यः पुमानिह । आशीविषविषं तीक्ष्णं ततस्तीक्ष्णतरो द्विजः । ब्रह्माशीविषदग्धस्य नास्ति कश्चिच्चिकित्सकः । तस्मिन् व्रजति दुर्द्धर्षे प्रास्खलद्रुक्मिणी पथि । तन्नामर्षयत श्रीमांस्ततस्तूर्णमचोदयत् । ततः परमसंक्रुद्धो रथात् प्रस्कन्द्य सद्विजः । पदातिरुत्पथेनैव प्राद्रवद्दक्षिणामुखः । तमुत्पथेन धावन्तमन्वधावं द्विजोत्तमम् । तथैव पायसा दिग्धः प्रसीद भगवन्निति । ततो विलोक्य तेजस्वी ब्राह्मणो मामुवाच ह । जितः क्रोधस्त्वया कृष्ण! प्रकृत्यैव महाभुज ! । न तेऽपराधमिह वै दृष्टवानस्मि सुव्रत ! । प्रीतोऽस्मि तव गोविन्द ! वृणु कामान् यथेप्सितान्" ।

**दुर्विगाह** त्रि० दुर्+वि+गाह—कर्मणि खल् । १दुःखेन गाहनीये २धृतराष्ट्रपुत्रभेदे पु० "दुर्मदो दुर्विगाहश्च विवित्सुर्विकटाननः" भा०आ०११७अ० ।

**दुर्विदग्ध** त्रि० दुष्टो विदग्धः प्रा०स० । गर्विते "अलीकवेगदुर्विदग्धं गरुत्मन्तम्" काद० ।

**दुर्विदत्र** त्रि०विद—लाभे विद—ज्ञाने वा बा०अत्र विदत्रं लभ्यं धनं ज्ञानं वा ततः प्रा०ब०। १दुर्धनके २दुर्ज्ञानके च "आरे मन्युं दुर्विदत्रस्य धीमहि" ऋ०१०।३५।४। "दुर्विदत्रा निर्ऋतिर्न" ऋ०१०।३६।२।

**दुर्विध** त्रि० दुष्टा विधाऽस्य प्रा०ब० । दरिद्रे अमरः । (दमयन्तीवर्णने) "अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम्" नैष० "विविनक्ति न बुद्धिदुर्विधः" माघः । २खले मेदि० ३मूर्खे शब्दर० । "शास्त्रेष्वन्येषु कुधियो विद्यमानेषु दुर्विधाः । बुद्धिमान्वीक्षिकीं प्राप्य निरर्थान् प्रवदन्ति ते" रामा० २।१०८।२

**दुर्विनय** पु० दुर्+वि+नी—भावे अच् । विनयराहित्ये । दुर्+वि+नी—क्तिन् । दुर्विनीति तत्रार्थे स्त्री

**दुर्विनीत** त्रि० दुर्+वि+नी—कर्त्तरि क्त । १विनयाकर्तरि विनयशून्ये २अशिक्षिताश्वे पुंस्त्री०हेमच०स्त्रियां जातित्वात् ङीष् ।

**दुर्विमोचन** त्रि० दुःखेन विमोचनं यस्य । १दुःखेन मोचनीये २धृतराष्ट्रपुत्रभेदे पु० "चित्रबाहुश्चित्रवर्मा सुवर्मा दुर्विमोचनः" भा०आ०११७अ० । तत्पुत्रोक्तौ तु ६७अ०। दुर्विरोचन इति पाठान्तरम् । सोऽपि तत्पुत्रभेदे

**दुर्विवाह** पु०निन्दितो विवाहः प्रा०स० । ब्राह्मादिचतुष्कभिन्नेषु आसुरादिषु चतुर्षु विवाहेषु ब्राह्मादीनष्टौ विवाहाननुक्त्वा मनुनोक्तं यथा

"ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः । ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः । रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः । पर्य्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः । इतरेषु तु शिष्टेषु नृशंसानृतवादिनः । जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः । अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा । निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्"

**दुर्विष** पु०दुःस्थितो विषोऽस्य प्रा०ब०। विषजनितविकारशून्ये शिवे "दुर्द्धर्षो दुष्प्रकाशश्च दुर्विषो दुर्जयोऽजयः" भा०आ०२८६अ० शिवनामोक्तौ । तस्याऽमृतमन्थनकाले विषपानेऽपि तज्जनविकारराहित्यात् विषविकारस्य तं प्रति दुःस्थितत्वात्तस्य तथात्वम् । दुष्टो विषो वा मेयत्वे नास्त्यस्य अच् वा । दुष्टविषपानाद्वा तस्य तथात्वम्।

**दुर्विषह** त्रि० दुःखेन विषह्यतेऽसौ दुर्+वि+सह—कर्मणि खल् । १सोढुमशक्ये दुःखेन सहनीये "सैषा दुर्विषहा माया देवैरपि दुरासदा" हरिवं० ४६अ० २शिवे पु० "दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः" भा०आ०२८६अ०। ३धृतराष्ट्रपुत्रभेदे "दुर्योधनो दुर्विषहो दुर्मुखो दुष्प्रधर्षणः" भा०आ०१८६अ० तत्पुत्रोक्तौ

**दुर्वृत्त** न० दुष्टं वृत्तम् प्रा०स० । १निन्दिते आचरणे "दुर्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवानृषिः" भा०आ०१अ० दुष्टं वृत्तमस्य प्रा०ब० । २दुर्जने "दुर्वृत्तवृत्तशमनं तव देवि ! शीलम्" देवीमा० "चाटुतस्कर दुर्वृत्तमहासाहसिकादिभिः" याज्ञ०

**दुर्वेद** त्रि० दुःखेन विद्यते लभ्यतेऽसौ दुर्+विद+लाभे—कर्मणि खल् । १लब्धुमशक्ये दुःखेन लभ्ये "ये एव के च मानव्यौ स्नातां दुर्वेदे एव वधा श्रुतिर्यदि वधां श्रुतिं न विन्देदपि" शत०ब्रा० ५।१।१।१ दुर्लक्षो वेदोऽस्य प्रा०ब० । २वेदपाठरहिते च । "दुर्वेदा वा सुवेदा वा प्राकृताः संस्कृतास्तथा । ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः" भा०व०१८९अ०